अघोत्थायस्य चार्वङ्गि ! रहस्यं प्रवदामि ते ॥"
इति कामधेनुतन्त्रे ३२ पटलः ॥*॥
अपि च । अथ सङ्कल्पविधानम् ।
"असङ्कल्पितमर्त्यो यन्न्यूनाधिकमथापि वा ।
न सम्यक्फलभाग्भूयात्तस्मान्नियममाचरेत् ॥
ताम्रपात्रं सदूर्व्वञ्च सतिलं जलपूरितम् ।
सकुशञ्च फलैर्द्देवि ! गृहीत्वाचम्य कल्पतः ॥
अभ्यर्च्य च शिरःपद्मे श्रीगुरुं करुणामयम् ।
यद्येशवदनो वापि देवेन्द्रवदनोऽपि वा ॥
मासं पक्षं तिथिञ्चैव देवपर्व्वादिकन्तथा ।
आद्यन्तकालञ्च तथा गोत्रं नाम च कामिनाम्
क्रियाद्वयं करिष्येऽन्त्यमिदं समुत्सृजेत् पयः ॥"
इति योगिनीतन्त्रे प्रथमखण्डीयः २ पटलः ॥*॥
अन्यच्च । शिवपूजायां मानससङ्कल्पो यथा,—
"ततस्तु परमेशानि ! कृत्वा सङ्कल्पमानसम् ।
यथापूर्व्वं महादेवि ! ब्रह्माण्डस्थितिमानसः ॥
तथा भवतु सर्व्वाङ्गं इति सङ्कल्प्य मानसः ।
न गोत्रं मम देवेशि ! न नाम परमेश्वरि ॥
न माता परमेशानि न पिता मम कामिनि ।
तस्मिन् काले महेशानि मम सर्वं न हि प्रिये ॥
न वारं न तिथिं देवि तस्मिन् काले शुचिस्मिते
न काष्ठां न कलां देवि तस्मिन् काले वरानने
न दिवा परमेशानि न रात्रिं परमेश्वरि ।
अतएव महेशानि सङ्कल्पं मानसं स्मृतम् ॥
मानसं यदि आयाति तदा स्थानेन किं प्रिये ।
सङ्कल्पं मानसं देवि चतुर्व्वर्गप्रदायकम् ॥
स्थूलं हि परमेशानि सङ्कल्पं व्यर्थमुच्यते ॥
सङ्कल्पेन विना देवि यत्किञ्चित् कृतवान्सुधीः
तदुक्तं परमेशानि तत् सर्व्वं मानसं परम् ॥
यदुक्तं परमेशानि मुनिना क्षुद्रबुद्धिना ।
तत् सर्व्वं परमेशानि व्यर्थं भवति पार्व्वति ।
इति सङ्कल्पमाचर्य्य जीवन्यासं समाचरेत् ॥"
इति लिङ्गार्च्चनतन्त्रे ५ पटलः ॥

सङ्कल्पजन्मा, [न्] पुं, (सङ्कल्पात् जन्म यस्य ।) कामदेवः । इति हलायुधः ॥ (यथा, कथासरित्सागरे । ४९ । २३८ ।
"दग्धोऽपि कामः सङ्कल्पजन्मा शर्व्वेण निर्म्मितः ॥")

सङ्कल्पभवः, पुं, (सङ्कल्पात् भव उत्पत्तिर्यस्य ।) कामदेवः । इति त्रिकाण्डशेषः ॥ (अभिलाषसम्भूतमात्रे, त्रि । यथा, महाभारते । १३ । ४१ । ८ ।
"त्वदर्थमागतं विद्धि देवेन्द्रं मां शुचिस्मिते ।
क्लिश्यमानमनङ्गेन त्वत्सङ्कल्पभवेन ह ॥")

सङ्कल्पयोनिः, पुं, (सङ्कल्पात् योनिर्यस्य ।) कामदेवः । इति हेमचन्द्रः ॥

सङ्कसुकः, त्रि, (सम्यक् कसति इतस्ततो गच्छतीति । सम + कस गतौ + "समि कसेरुकन् ।" उणा० २ । २९ । इति उकन् ।) अस्थिरः । इत्यमरः ॥ दुर्ब्बलः । इत्युणादिकोषः ॥ मन्दः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ संकीर्णः । अपवादशीलः । इति संक्षिप्तसारोणादिवृत्तिः ॥

(यथा, महाभारते । १२ । १९३ । १३ ।
"लोष्टमर्द्दी तृणच्छेदी नखखादी तु यो नरः ।
नित्योच्छिष्टः सङ्कसुको नेहायुर्विन्दते महत् ॥")

सङ्कारः, पुं, (संकीर्य्यते इति । सं + कॄ + विक्षेपे + घञ् ।) सम्मार्ज्जन्या क्षिप्तधूल्यादिः । इति शब्दरत्नावली ॥ अग्निचटत्कारः । इति मेदिनी ॥

सङ्कारी, स्त्री, नवदूषितकन्या । इति मेदिनी ॥

सङ्काशः, त्रि, (सम्यक् काशते प्रकाशते इति । काश + पचाद्यच् ।) सदृशः । (यथा, महाभारते । १ । १२३ । ३ ।
"आजगाम ततो देवो धर्म्मो मन्त्रबलात् ततः ।
विमाने सूर्य्यसङ्काशे कुन्ती यत्र जपस्थिता ॥")
अन्तिकः । इति विश्वः ॥

सङ्किलः, पुं, दहनोल्का । इति त्रिकाण्डशेषः ॥

सङ्कीर्णं, त्रि, (सं + कॄ + क्तः ।) जनादिभिर्निरवकाशः । इति भरतः ॥ नानाजातिसंमिलितम् । इति भानुदीक्षितः ॥ तत्पर्य्यायः । सङ्कुलम् २ आकीर्णम् ३ । इत्यमरः ॥ निचितम् ४ । इति नानार्थे अमरः ॥ व्याप्तम् ५ समाकीर्णम् ६ । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । १३४ । २९ ।
"द्रोणः सङ्कीर्णयुद्धे च शिक्षयामास वीर्य्यवान् ॥")
सङ्कटः । इत्यजयः । परस्परविजातीयः । यथा,
"विशेष्यनिघ्नैः संकीर्णैर्नानार्थैरव्ययैरपि ।"
इत्यमरश्लोकटीकायां भरतः ॥
अशुद्धः । इति नानार्थे अमरः ॥

सङ्कीर्णः, पुं, (सं + कॄ + क्तः ।) अम्बष्ठकरणादिचाण्डालपर्य्यन्तमिश्रजातिः । इत्यमरः ॥ मिश्रितरागः । इति संगीतशास्त्रम् ॥

सङ्कीर्त्तनं, क्ली, स्त्री, (सं + कीर्त्त + ल्युट् ।) सम्यक्प्रकारेण देवतानामोच्चारणम् । गुणादिकथनम् । यथा,—
"कृष्णवर्णं त्विषा कृष्णं साङ्गोपाङ्गास्त्रपार्षदम्
यज्ञैः सङ्कीर्त्तनप्रायैर्यजन्ति हि सुमेधसः ॥"
इति श्रीमद्भागवते ११ स्कन्धे ५ अध्यायः ॥
"कृष्णतां व्यावर्त्तयति । त्विषा कान्त्या कृष्णं इन्द्रनीलमणिवदुज्ज्वलम् । यद्वा त्विषा कृष्णं कृष्णावतारं अनेन कलौ कृष्णावतारस्य प्राधान्यं दर्शयति । अङ्गानि हृदयादीनि । उपाङ्गानि कौस्तुभादीनि । अस्त्राणि सुदर्शनादीनि । पार्षदाः सुनन्दादयः । तत्सहितं यज्ञै रर्च्चनैः । सङ्कीर्त्तनं नामोच्चारणं स्तुतिश्च तत्प्रधानैः । सुमेधसो विवेकिनः ।" इति तट्टीकायां श्रीधरस्वामी ॥*॥ तन्माहात्म्यं यथा,—
"सङ्कीर्त्तनध्वनिं श्रुत्वा ये च नृत्यन्ति मानवाः ।
तेषां पादरजःस्पर्शात् सद्यः पूता वसुन्धरा ॥"
इति बृहन्नारदीयपुराणम् ॥
अपि च ।
"नामसङ्कीर्त्तनं यत्र कृष्णस्य परमात्मनः ।
स्थानं तत्तु पवित्रं स्यान्मृतानां तत्तु मुक्तिदम् ॥"
इति पद्मपुराणम् ॥*॥
प्रथमसङ्कीर्त्तनारम्भप्रमाणं यथा । पुष्करतीर्थे नारदं प्रति ब्रह्मवाक्यम् ।
"श्रीकृष्णरससङ्गीतं वीणाध्वनिसमन्वितम् ।
कुरु वत्साधुनाचैव शृण्वन्तु मुनयः सुराः ॥
गोपीनां वस्त्रहरणं परं रासमहोत्सवम् ।
ताभिः सार्द्धं जलक्रीड़ां हरेरुत्कीर्त्तनं कुरु ॥
कृष्णसङ्कीर्त्तनं तूर्णं पुनाति श्रुतिमात्रतः ।
श्रोतारञ्च प्रवक्तारं पुरुषैः सप्तभिः सह ॥
यत्रैव प्रभवेद्वत्स ! तन्नामगुणकीर्त्तनम् ।
तत्र सर्व्वाणि तीर्थानि पुण्यानि मङ्गलानि च ॥
तत्कीर्त्तनध्वनिं श्रुत्वा सर्व्वाणि पातकानि च ॥
दूरादेव पलायन्ते वैनतेयमिवोरगाः ॥
तद्दिनं सफलं धन्यं यशस्यं सर्व्वमङ्गलम् ।
श्रीकृष्णकीर्त्तनं यत्र तत्र वै नायुषोऽव्ययः ॥
कृष्णसंकीर्त्तनस्थाने ये च नृत्यन्ति वैष्णवाः ।
तेषां पादरजःस्पर्शात् सद्यः पूता वसुन्धरा ॥
उत्कीर्त्तनं भवेद्यत्र कृष्णस्य परमात्मनः ।
स्थानं तच्च भवेत्तीर्थं मृतानां तच्च मुक्तिदम् ॥
नात्र पापानि तिष्ठन्ति पुण्यानि सुस्थिराणि च ।
तपस्विनाञ्च व्रतिनां व्रतानां तपसां स्थलम् ॥
वर्त्तन्ते पापिनां देहे पापानि त्रिविधानि च ।
महापापोपपापातिपापान्येव स्मृतानि च ॥
कृष्णसंकीर्त्तनाद्ध्यानात्तन्मन्त्रग्रहणादहो ।
मुच्यन्ते पातकैस्तैश्च पापिनस्त्रिविधा जनाः ॥"
इति नारदपञ्चरात्रे ज्ञानामृतसारे प्रथमैकरात्रे महोत्सवारम्भो नाम १० अध्यायः ॥

सङ्कीर्त्तितः, त्रि, (सं + कीर्त्त + क्तः ।) सम्यगुच्चरितः । संस्तुतः । यथा,—
"अज्ञानादथवा ज्ञानादुत्तमश्लोकनाम यत् ।
संकीर्त्तितमघं पुंसो दहेदेधो यथानलः ॥"
इति श्रीभागवते ६ स्कन्धे २ अध्यायः ॥

सङ्कुचितं, क्ली, (सं + कुच् + क्तः ।) संकोचयुक्तम् । अप्रफुल्लम् । तत्पर्य्यायः । निद्राणम् २ मीलितम् ३ मुद्रितम् ४ । इति हेमचन्द्रः ॥ सुप्तम् ५ मिलितम् ६ नतम् ७ निकुञ्चितम् ८ । सनिद्रम् ९ अलसम् १० । इति राजनिर्घण्टः ॥ (यथा, आर्य्यासप्तशत्याम् । ६५४ ।
"सङ्कुचिताङ्गीं द्विगुणांशुकां मनोमात्रविस्फुरन्मदनाम् ।
दयितां भजामि मुग्धामिव तुहिन इव प्रसादेन ॥")

सङ्कुलं, क्ली, (सङ्कुलतीति । सं + कुलं संस्त्याने + इगुपधेति कः ।) युद्धम् । इत्यजयः ॥ (यथा, हरिवंशे । ९१ । ९५ ।
"ततो बलेन महता गजानीकेन चाप्यथ ।
उभयोरन्तरं ताभ्यां सङ्कुलं समपद्यत ॥")
परस्परपराहतवाक्यम् । तत्पर्य्यायः । क्लिष्टम् २ । इत्यमरः ॥ "द्वे पूर्व्वापरविरुद्धे वाक्ये । यथा—
'यावज्जीवमहं मौनी ब्रह्मचारी पिता मम ।
माता च मम वन्ध्या स्यात् स्मरामोऽनुपमो भवान् ॥'